© 2018 IJSRST | Volume 4 | Issue 7 | Print ISSN: 2395-6011 | Online ISSN: 2395-602X

# प्राथमिकस्तरे संस्कृतभाषाकौशलविकासाय भाषाक्रीडाः



**डा के. गिरिधररावः**
सहायकाचार्यः (शिक्षा)
**राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः),**
**गुरुवायूर् परिसरः,**
**पुरनाट्टुकरा, त्रिचूर् केरलम् ।**

शोधालेखसारः – भाषा नाम विचारस्य सम्प्रेषणसाधनम् । क्रीडा नाम केली । यस्यां मनुजः आनन्दम् उत्साहञ्च अनुभवति । सा शारीरिक – मानसिक – बौद्धिकक्रियाविशेषा । यतोहि बाल्यकाले छात्राणां क्रीडायामेव रुचिर्भवति कक्ष्याशिक्षणे संस्कृताध्यापकाः प्रतिदिनं पञ्चनिमेषान् यावत् भाषाक्रीडामाश्रित्य शिक्षणेन छात्राः उत्साहेन आनन्देन च संस्कृतभाषाज्ञानं प्राप्नुवन्ति । तेन संस्कृतभाषायाः विकासः विस्तारश्च भवितुमर्हति ।

**मुख्यः शब्दः–** शारीरिक, मानसिक, बौद्धिक, क्रिया, विशेषा, क्रीडा, भाषा|

भाष्यते अभिव्यज्यते स्वीयभावः अनया इति भाषा । भाषा नाम विचारस्य सम्प्रेषणसाधनम् । क्रीडा नाम केली । यस्यां मनुजः आनन्दम् उत्साहञ्च अनुभवति । सा शारीरिक – मानसिक – बौद्धिकक्रियाविशेषा । यतोहि बाल्यकाले छात्राणां क्रीडायामेव रुचिर्भवति । क्रीडया एव मनोरञ्जनं प्राप्नुवन्ति। अतः छात्राः क्रीडायै भृशं स्पृहयन्ति । **बालास्तावत् क्रीडासक्ताः** इति श्रीशङ्करभगवत्पादैरपि उक्तं वर्तते । अतः शिक्षाशास्त्रिणः शिक्षणं प्रभावजनकं सम्पादयितुं बालमनोविज्ञानमाधारीकृत्य शिक्षणस्य बहून् नूतनविधीन् आविष्चक्रुः ।

भाषा यदि आनन्देन, उल्लासेन, क्रीडया शिक्ष्यते तर्हि बालकाः आनन्दमनुभवन्तः लीलया भाषामधिगच्छन्ति । बालकेषु क्रीडासक्तत्वम् असाधारणस्वभावविशेषरूपेण दृश्यते । अत एव कालिदासः कुमारसम्भवे –

**मन्दाकिनीसैकतवेदिकाभिः सा कन्दुकैः कृत्रिमपुत्रकैश्च ।**
**रेमे मुहुर्मध्यगता सखीनां क्रीडारसं निर्विशतीव बाल्ये ।।**

इति पार्वत्याः क्रीडां वर्णयति । अतः क्रीडायां तादृशी शक्तिः वर्तते इति ज्ञात्वा भाषाशास्त्रज्ञाः भाषाशिक्षणार्थं भाषाक्रीडाः आविष्कृतवन्तः । अत्र भाषाकौशलसंवर्धनाय विविधक्रियाकलाप- क्रीडाभिः शिक्षणं दीयते ।छात्राः अपि अहमहमिकया अभिरुच्या भाषाभ्यासं कुर्वन्ति । छात्रेषु यदा येषु विषयेषु अभिरुचिः भवति तदा तान् विषयान् शीघ्रम् अनायासेन च अधिगच्छन्ति । अतः यदा बालकाय भाषाशिक्षणं दीयते तदा अमुं विधिमध्यापकः प्रयोक्तुं शक्नोति ।

क्रीडा एव यथार्थशिक्षणम्, जगति असाधारणप्रतिभावतां छात्राणाम् आविर्भावः क्रीडाद्वारैव सञ्जातः । बाल्ये बालकानां शारीरिक - मानसिकस्वास्थ्यं सम्पाद्य शान्तबुद्ध्या कष्टेन विना कार्यकरणाद्भुतशक्तिः क्रीडाद्वारैव सम्पादयितुं शक्यते इति प्रसिद्धशिक्षाविद् “गिजुभाई” वदति ।

प्रसिद्ध मनोविज्ञानी जान् पियोषे (John Piaget)महोदयः क्रीडायाः विषये एवमवोचत् “Play consists of responses for pure pleasure” इति ।

भाषाक्रीडाः छात्रकेन्द्रिताः भवन्तीत्यतः प्राथमिकावस्थायां भाषाक्रीडाः भाषाकौशलानां विकासे अत्यन्तं प्रभावं जनयन्ति । विविधाभिः भाषाक्रीडाभिः छात्रेषु धारणशक्तिः, स्वतन्त्रचिन्तनशक्तिश्च एधते । आत्महीनभावः नश्यति । भाषाक्रीडाः बौद्धिकशक्तिं संवर्ध्य सर्जनात्मकशक्तेः विकासं कुर्वन्ति । किञ्च भाषाक्रीडाभिः वैयक्तिक-सामूहिकपरिश्रमयोः विषये आदरभावः, सङ्घभावश्च संवर्धते । अनया छात्राः नायकत्वगिणान् आत्मसु वर्धयन्ति । अनया शिक्षणेन छात्राः सक्रियाः भवन्ति । कक्ष्यायाः नीरसवातावरणमपि सरसं भवति ।

भाषाक्रीडाणां कानिचन प्रमुखतत्त्वानि इत्थं सन्ति । तानि –

1. कृत्वा अधिगमः ।
2. स्वतन्त्रवातावरणे अधिगमः ।
3. स्वतन्त्ररूपेण चिन्तनाय अवसरः ।
4. छात्राणाम् अभिरुच्यनुसारम् आवश्यकतानुसारञ्च शिक्षणम् ।
5. अनौपचारिकतया सहजरूपेण च अधिगमः ।

प्राथमिकस्तरे संस्कृतभाषाशिक्षणस्य अधिगमाय भाषाक्रीडा नितान्तमुपकरोतीति संस्कृतविदुषामभिप्रायः । भाषाशिक्षणस्य प्रधानमुद्देश्यं भवति श्रवण – भाषण – पठन – लेखनादीनां चतुर्णां कौशलानां विकासः । एतेषां कौशलानामभ्यासार्थं काश्चन भाषाक्रीडाः पश्यामः ।

**पदक्रीडाः** – चतुर्षु कौशलेषु भाषणकौशलं पदक्रीडया प्रधानतया वर्धते । प्राथमिकस्तरे पदानामभ्यासार्थम् एताः क्रीडाः उपकुर्वन्ति । छात्रेषु पदजालाभिवृद्धिं कारयित्वा शब्दप्रपञ्चे अधिकारं प्राप्तुम् इमाः क्रीडाः अत्यन्तमुपस्कुर्वन्ति । यथा एकं दीर्घं वाक्यं विलिख्य शिक्षकः कक्ष्यामानयेत् । तद्वाक्यं श्यामफलके लिखित्वा अर्थयुक्तपदानां निर्माणार्थं छात्रान् प्रेरयति । छात्राः तदाधारेण पदानि रचयन्ति । यथा –

**इ न र ल ण क च य म व ता अ मा ध म् च उ स्तु ज ई :**

| | | | | | |
|---|---|---|---|---|---|
| उमा | लता | मनः | धनम् | करः | उरः |
| नरः | वधः | जनः | यमः | माता | रणम् |
| वनम् | लवणम् | चरणम् | माधवः | तालः | अस्तु |
| नयनम् | वचनम् | कमलम् | मरणम् | अलम् | चयनम् |

**पद-अन्त्याक्षरीक्रीडा** –अन्त्याक्षरी नाम अन्तिमाक्षरम् । एकः एकस्य पदस्य कथनानन्तरं तस्य पदस्य अन्तिमाक्षरस्य आधारेण नूतनपदस्य निर्माणं करोति । एषा एव अन्त्याक्षरीक्रीडा इत्युच्यते । छात्राणां स्मरणशक्तेः परीक्षणार्थम् अन्त्याक्षरीक्रीडा एकं मूल्याङ्कनसाधनं भवति । यथा –

चषकः
कमलम्
लता
ताम्बूलम्
ललना
नाटकम्
कनकम्

एवमेव माध्यमिकस्तरे श्लोकान्त्याक्षरीक्रीडा अपि क्रीडितुं शक्यते।

**वाक्यनिर्माणक्रीडाः** – भाषायाः उपयोगसामर्थ्यम् अनया क्रीडया भवति। अध्यापकः एकस्मिन् स्फोरकपत्रे कर्तृ - कर्म - क्रियापदानि विलिख्य आनयेत्। ततः पदत्रयं स्वीकृत्य वाक्यनिर्माणं कर्तुं सूचयति। यथा –

| | | | |
|---|---|---|---|
| **एषा** | **सायं** | **लिखति** | **प्रातः** |
| **गोपालः** | **मध्याह्ने** | **अद्य** | **उपविशति** |
| **कथां** | **पठति** | **चिन्तयति** | **रमा** |

**कथानिर्माणक्रीडाः** – छात्रेषु सर्जनात्मकशक्तेः विकासाय इमाः क्रीडाः अत्यन्तम् उपकुर्वन्ति। भावावगाहनसामर्थ्यं वर्धयन्ति। यथा - एकस्मिन् स्फोरकपत्रे कथायां विद्यमान प्रधान सन्निवेशसम्बद्धानि पदानि विलिख्य तदाधारेण कथानिर्माणाय छात्रान् सूचयेत्।

| | | |
|---|---|---|
| **काचित्** | **वृद्धा** | **चत्वारः** |
| **पुत्राः** | **परस्परकलहः** | **वृद्धायाः** |
| **चिन्ता** | **उपायं** | **आत्मीयता** |

**कथापूरणक्रीडाः** – कथाप्रक्रिया बालानां विषये अद्भुतम् इन्द्रजालमिव कार्यं करोति। अस्याः क्रीडायाः द्वारा छात्रेषु भावस्य अवगाहनसामर्थ्यम् एधते। यथा - कथामारभ्य पूर्णं न करोति चेत् छात्राः पूर्णकथां ज्ञातुम् इच्छुकाः भवन्ति। यदि अपूर्णकथाम् ऊहां कृत्वा वदतु इति कथयामः तर्हि एकैकः एकैकरीत्या कथां पूरयति। इत्थम् अभ्याससम्पादनेन सन्देश-चन्दमामादि पत्रिकाः पठित्वा ते अपि कथाः वदन्ति।

**व्याकरणक्रीडाः** – प्राथमिकदशायां प्रायोगिकव्याकरणस्य अभ्यासार्थं क्रीड्यन्ते इमाः क्रीडाः। यथा – मण्डलाकारे छात्रान् उपावेश्य (लट्) वर्तमानक्रियापदानि एकवचने एकैकः एकं वदतु इति सूचयति। छात्राः लट् लकारस्य वर्तमाने एकवचनक्रियापदानि वदन्ति। तदनन्तरं द्विवचनं, बहुवचनमपि। एवं प्रकारेण बहूनि क्रियापदानि, क्त्वा-तुमुन्-ल्यप् आदीनि प्रत्ययरूपाण्यपि क्रीडाद्वारा अभ्यासं कारयितुं शक्यन्ते।

**संख्याक्रीडाः** – संख्यायाः अभ्यासार्थम् अत्यन्तम् उपयोगिनी क्रीडा भवति संख्याक्रीडा। अस्यां बहवः प्राकाराः सन्ति।

1. व्युत्क्रमेण संख्याकथनम् – यथा 100, 99, 98, 97, 96, 95............।
2. एकश्वासेन संख्याकथनम् – अत्र एकवारं श्वासं स्वीकृत्य श्वाकसमाप्त्यभ्यन्तरे अत्यधिकसंख्याः वक्तव्याः। तेन संख्याः स्मरणे अपि तिष्ठन्ति।

एवं प्रकारेण संख्यायोजनम्, ओं क्रीडा, रामकृष्णक्रीडा इत्यादयः सन्ति।

**उपसंहारः** - भाषाक्रीडामाश्रित्य अत्यन्तं सहजतया छात्राभिरुच्यनुसारं संस्कृतभाषाशिक्षणेन शीघ्रं विना क्लेशं संस्कृतभाषामधिगच्छन्ति छात्राः। कक्ष्याशिक्षणे संस्कृताध्यापकाः प्रतिदिनं पञ्चनिमेषान् यावत् भाषाक्रीडामाश्रित्य शिक्षणेन छात्राः उत्साहेन आनन्देन च संस्कृतभाषाज्ञानं प्राप्नुवन्ति। तेन संस्कृतभाषायाः विकासः विस्तारश्च भवितुमर्हति।

**सन्दर्भग्रन्थसूची –**


- डा आशा भन्साली, संस्कृतशिक्षण के नवीन आयाम, राजस्थानी ग्रन्थागार, जोधपूर् , 2004 ।
- डा विश्वासः, कौशलबोधिनी, संस्कृतभारती, नवदेहली – 2005 ।
- डा च. ल. ना. शर्मा, डा फतेहसिंहश्च, संस्कृतशिक्षणम् नवीनप्रविधयश्च, आदित्यप्रकाशनम्, जयपुरम्, 2008 ।
- डा सन्तोष मित्तल, संस्कृतशिक्षणम्, नवचेतना पब्लिकेषन्स्, जयपुरम् , 2006 ।
- डा शशिप्रभा जैन्, व्यावहारिकसंस्कृतशिक्षण, न्यू भारतीय बुक कोर्पोरेशन, दिल्ली, 2012 ।
- नारायणशर्मा, भाषा 1, 2 की शिक्षण विधियाँ एवं पाठनियोजन, श्रीविनोद पुस्तकमन्दिर, आगरा – 2013 ।
- डा रामशकल पाण्डेय, संस्कृतशिक्षण, श्रीविनोद पुस्तकमन्दिर, आगरा – 2014 ।
- http:// www. Kindergartenpreschool.com.
- http:// www. Coolg.in/article/preschool-teaching-methods.
- Vallabhi, Teaching methods of English, Neelkamal Publications, Hyderabad.


* * * * *